# विजयश्रीः २०११

एं ऐ एं हयर् सेकन्डरि स्कूल्,पेरोड्

वटकरा विद्याभ्यासजिल्ला

**व्याकरणांशाः**

कोष्ठके प्रदत्तस्य पदस्य उचितरूपेण रिक्तस्थानानि पूरयत।/

प्रकोष्ठाद् उचितं रूपं स्वीकृत्य रिक्तस्थानानि पूरयत।

| | | | |
|---|---|---|---|
| १ | ....................परितःछात्राः तिष्ठन्ति। | [ अध्यापिका ] | अध्यापिकाम् |
| २ | छत्रं ............... त्रायते। | [ आतपः ] | आतपात् |
| ३ | उभयतः............ क्षेत्राणि सन्ति। | [ रथ्या] | रथ्याम् |
| ४ | मोदकं रोचते | [ बालकः ] | बालकाय |
| ५ | अहं ............. साकं विद्यालयं गच्छामि | [ पिता ] | पित्रा |
| ६ | रमेशः............... पुत्रः। | [ किम् ] | कस्य |
| ७ | परितः.............. बालाः क्रीडन्ति। | [ वृक्षः ] | वृक्षम् |
| ८ | रमेशः............... सह विद्यालयं गच्छति | [ मञ्जुला ] | मञ्जुलया |
| ९ | दुर्जनाः .............कुप्यन्ति। | [ सज्जनाः] | सज्जनाय |
| १० | वयं संस्कृतम्.................. | [ पठ् ] | पठाम |
| ११ | अध्यापकः ........ आदिदेश | [ छात्राः ] | छात्रान् |
| १२ | ..................... परितः पिपीलिकाःसन्ति। | [ शर्करा] | शर्कराम् |
| १३ | अहं............... सह विद्यालयं गच्छामि | [ अध्यापकः ] | अध्यापकेन |
| १४ | रामः............... क्रुध्यति। | [ रावणः ] | रावणाय |
| १५ | रामः ............... सह वनमगच्छत् | [ सीता] | सीतया |
| १६ | त्वं...................कक्ष्यायां पठसि। | [ किम् ] | कस्यां |
| १७ | ......................परितःगोपिकाःनृत्यन्ति। | [ कृष्णः] | कृष्णम् |
| १८ | ......................उभयतःवृक्षाःसन्ति। | [ मार्गः] | मार्गम् |
| १९ | राजा ............... क्रुध्यति । | [ सेवकः ] | सेवकाय |
| २० | पिता च ........... मारितः। | [ वनचोराः] | वनचोरैः |

२१ कृष्णेन ग्रामः........ [ गच्छति, गम्यते] गम्यते

२२ रजनी पुस्तकं.............। [ पठति,पठ्यते ] पठति

२३ रमा ...................... लेखनीं पृच्छति। [ अध्यापिका ] अध्यापिकाम्

२४ बालिका ...............सह मन्दिरं गच्छति। [ माता] मात्रा

२५ अनन्तः....................नगरे वसति। [ किम् ] कस्मिन्

२६ .....................बहिःःछात्राः तिष्ठन्ति। [ कार्यालयः] कार्यालयात्

२७ आम्रं.......................रोचते। [ शिशुः ] शिशवे

२८ रामः.......................बहिः अगच्छत्। [ गृहम्] गृहात्

२९ ...........................बालकस्य नाम किम्। [ उत्तमः] उत्तमस्य

३० माता.......................पोषयति। [ बालः ] बालम्

३१ छात्रः.......................बहिःतिष्ठति। [ कक्ष्या ] कक्ष्यायाः

३२ जनाः.......................बहिर्गच्छन्ति। [ नगरम् ] नगरात्

३३ पथिकः.....................नामं पृच्छति। [ किम् ] कस्य

३४ बालाः......................बहिः क्रीडन्ति। [ गृहम् ] गृहात्

३५ .............................परितः भ्रमराःभ्रमन्ति। [ पुष्पम् ] पुष्पम्

३६ छात्रैः पुस्तकानि..........[ पठन्ति,पठ्यन्ते ] पठ्यन्ते

३७ अध्यापकैः चित्राणि.......[ निरीक्ष्यति ,निरीक्ष्यन्ते] निरीक्ष्यन्ते

३८ सावित्री नृत्तं...............[ परिशीलयति,परिशील्यन्ते ] परिशीलयति

३९ रुदन्तं बालकं माता.......अलं इति समाश्वासयत् । [रोदनम् ] रोदनेन

४० पित्रा निवारितोऽपि सः.....न अवततार। [ शकटम् ] शकटात्

४१ श्रीशङ्करः...........समं भारते सर्वत्र पर्यटनं चकार।[शिष्याः] शिष्यैः

४२ बाला .....................पुष्पं यच्छति।[ शङ्करात् ,शङ्कराय] शङ्कराय

४३ वामन; बलिं --------------- अयाचत। [वसुधया/वसुधाम् ] वसुधाम्

४४ कक्ष्यायां........अलम् इति अध्यापकः निवारितवान्। [सम्भाषणम्] सम्भाषणेन

४५ रामःसीतया सह...........गतवान्।.........पर्णाश्रमं निर्माय अवसत् च।[ वने, वनम् ]
वनम् , वने

**१.१ स्तोत्रकाव्यानि महाकाव्यानि सञ्चित्य पट्टिकारूपेण लिखत।**

(रघुवंशः सौन्दर्यलहरी विशाखविजयम् नारायणीयम् केरलोदयम्
किरातार्जुनीयम्)

**१.२प्रदत्तेषु स्तोत्रकाव्यं महाकाव्यञ्च उद्धृत्य लिखत।**

(रघुवंशः ऋतुसंहारःनवभारतम् सौन्दर्यलहरी)

१.३**महाकाव्यानि चरित्रकाव्यानि च विविच्य लिखत।**

(नवभारतम्, क्रिस्तुभागवतम्,केरलोदयम्,मूषिकवंशम्, श्रीकृष्णविलासम्, किरातार्जुनीयम्)

**१.४प्रदत्तेषु स्तोत्रकाव्यानि महाकाव्यानि इतिहासकाव्यानि च उद्धृत्य लिखत।**

(श्रीकृष्णविलासम्, सौन्दर्यलहरी, किरातार्जुनीयम्, गीतगोविन्दम, क्रिस्तुभागवतम्, रामायणम् मुकुन्दमाला नारायणीयम्, रघुवंशः )

**महाकाव्यानि-** रघुवंशः। विशाखविजयम्। केरलोदयम्। किरातार्जुनीयम। नवभारतम्। क्रिस्तुभागवतम्। श्रीकृष्णविलासम्।

**स्तोत्रकाव्यानि** सौन्दर्यलहरी। नारायणीयम्। गीतगोविन्दम्। मुकुन्दमाला।

**चरित्रकाव्यानि** विशाखविजयम्। केरलोदयम्। नवभारतम्। मूषिकवंशम्।

**इतिहासकाव्यानि** रामायणम्।

१.५ अभिज्ञानशाकुन्तलस्य इतिवृत्तं कस्मात् स्वीकृतं भवति।
(महाभारतात् रामायणात् महाभागवतात्) **महाभारतात्**

१.६ द्रौपदीवचोभिः सूचिता युधिष्ठिरावस्था का।
(अलसता अधीरता अकर्मण्यता उदारता) **अकर्मण्यता**

१.७ किं गणे नान्तर्भवति।( ओथल्लो हांलट् नागानन्दम्)**नागानन्दम्**

१.८ किरातार्जुनीयं कस्मिन् काव्यविभागे अन्तर्भवति।
(महाकाव्ये चरित्रकाव्ये खण्डकाव्ये) **महाकाव्ये**

१.९ धनम् इत्यर्थकं पदं विवेचयत। (धाम मणिःवसुः) **वसुः**

१.१०किं गणे नान्तर्भवति। (ओथल्लो हितोपदेशः पञ्चतन्त्रम्) **ओथल्लो**

१.११ओथल्लो नाटकस्य कर्ता भवति
(टोल्स्टोयि षेक्स्पियर् मार्क्सिं गोर्कि) **षेक्स्पियर्**

१.१२ कः सौवर्णमङ्गुलीयकं विक्रेतुम् आपणं प्राप्तवान्
(स्यालः धीवरः स्वर्णकारः) **धीवरः**

**२.१श्लोकं पठित्वा प्रश्नानामुत्तराणि लिखत।**

२.१.१विजित्य यःप्राज्यमयच्छदुत्तरान् कुरूनकुप्यं वसु वासवोपमः।
स वल्कवासांसि तवाधुनाहरन् करोति मन्युं न कथं धनञ्जयः।।

क) श्लोके कं वर्णयति। **धनञ्जयम्।**

ख) अकुप्यं इत्यस्य अर्थः कः। **सुवर्णम्।**

ग) कस्याः वाक्यमिदम्। **द्रौपद्याः**

घ) धनञ्जयः केन उपमितः। **वासवेन**

२.१.२ व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान् निशिता इवेषवः।।

क)कीदृशाःमूढाः पराभवं व्रजन्ति। **मायाविषु ये न मायिनः ते।**

ख) मूढान् के घ्नन्ति। **शठा**

ग) निशिताः इषवः कथमिव घ्नन्ति। **असंवृताङ्गानिव**

घ) पराजयः इत्यस्य समानार्थकं पदम्। **पराभवम्**

ङ) इवेषवः इत्यस्य पदच्छेदं लिखत। **इव इषवः**

२.१.३भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि।
कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः।।

क)कस्य कं प्रति वचनमिदम्। **द्रौपद्याः,युधिष्ठिरम् प्रति**

ख)गर्हिते मार्गे कः वर्तते। **युधिष्ठिरः**

ग)रेखाङ्कितस्य पदस्य पदच्छेदं लिखत। **शुष्कम् इव अग्निः उच्छिखः।**

२.१.४ परिभ्रमंल्लोहितचन्दनोचितः पदातिरन्तर्गिरिरेणुरूषितः।
महारथःसत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः।।

क)कमुद्दिस्य अयं श्लोकः। **भीमसेनम्**

ख)अत्र सत्यधनशब्देन सूचितः कः। **युधिष्ठिरः**

ख)अस्मिन् श्लोके क्रियापदं किम्। **दुनोति**

घ)लोहितचन्दनोचितः वृकोदरःअद्य कीदृशः भवति।
**पदातिरन्तर्गिरिरेणुरूषितः।**

ङ)महारथः इति विशेषणेन भीमस्य कः गुणः प्रकाश्यते। **शौर्यगुणः।**

च)कच्चित् इत्यव्ययं कस्मिन्नर्थे प्रयुज्यते। **कदापि।**

२.१.५ भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम्।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः।।

क)अस्मिन् श्लोके क्रियापदं किम्। **व्यवसाययन्ति।**

ख)किमर्थं व्यवसाययन्ति। **वक्तुम्।**

ग)कीदृशाः दुराधयः। **निरस्तनारीसमया दुराधयः।**

घ)कीदृशमनुशासनम्। **प्रमदाजनोदितम्।**

२.१.६ विजित्य यःप्राज्यमयच्छदुत्तरान् कुरूनकुप्यं वसु वासवोपमः।
स वल्कवासांसि तवाधुनाहरन् करोति मन्युं न कथं धनञ्जयः।।

क)अस्मिन् श्लोके क्रियापदं किम्। **करोति।**

ख)कः मन्युं न करोति। **धनञ्जयः।**

ग)श्लोके क्रोधः इत्यर्थे प्रयुक्तं पदं किम्। **मन्युः।**

घ)तवाधुनाहरन् इत्यत्र सन्धिच्छेदःकः। **तव अधुना आहरन**

२.१.७ विजित्य यःप्राज्यमयच्छदुत्तरान् कुरूनकुप्यं वसु वासवोपमः।
स वल्कवासांसि तवाधुनाहरन् करोति मन्युं न कथं धनञ्जयः।।

क)अस्मिन् श्लोके क्रियापदं किम्। **करोति।**

ख)धनञ्जयः किं न करोति। **मन्युं**

ग)कीदृशं वस्तु अयच्छत्। **अकुप्यं**

घ)धनञ्जयः कीदृशः आसीत्। **वासवोपमः**

ङ)वसु इत्यस्य अर्थं किम्। **धनम्**

२.१.८ सामिपीतरसभङ्गसङ्गतक्रोधभारपरिभूतचेतसा।
मन्थदण्डमुपगृह्यपाटितं हन्त देव दधिभाजनं त्वया।।

क) किं पाटितम्। **दधिभाजनं**

ख) केन पाटितम्। **त्वया**

ग)कीदृशेन त्वया। **सामिपीतरसभङ्गसङ्गत क्रोधभारपरिभूतचेतसा**

घ)किमुपगृह्यपाटितम्। **मन्थदण्डमुपगृह्य**

**३.१ सूचनानुसारं पुटेनैकेन लिखत**

३.१.१ उलूखलबन्धनम्।

सूचना - यशोदया कृतं पुत्रलालनं ,दहने दुग्धं परिस्रुतं, क्षीरपानभग्नः, दधिभाजनस्य पाटनम् , उलूखले बन्धनम्, पाशानामभावः, बन्धनाय अनुमतिः,देवानां विस्मयः।

३.१.२ पुष्पकविमानम्।

सूचना - मणिवज्रचित्रितम्,महाप्रयत्नेन निर्मितम्, अनेकसंस्थानविशेष निर्मितम्, मारुततुल्यगामि बहुकूटमण्डितम्, निशाचरैर्वहन्तं,वसन्तमासा दपि चारुदर्शनम्।

**३.१.३ प्रदत्तस्य श्लोकस्याशयं सूचनासाहाय्येन लिखत।**

सम्पूर्णकुम्भो न करोतिशब्दमर्धोघटो घोषमुपैति नित्यम्।
विद्वान् कुलीनो न करोतिगर्वमल्पोजनो जल्पति साट्टहासम्।।

सूचना - कुम्भः-घटः। घोषम्- शब्दम्। उपैति- करोति। अल्पः - अल्पज्ञानी।

**३.१.४ पुष्पकविमानस्य सविशेषताःसूचनानुसारं लिखत।**

सूचना- मणिवज्रचित्रितम्,जाम्बूनदजालकृत्रिमम्,मनस्समाधान विचारचारिणं मारुततुल्यगामिनं,बहुकूटमण्डितम्,निशाचरैर्वाह्यमानम्।

**निर्देशः- सर्वाः सूचनाः स्वीकरणीयाः**

**आमुखम्** - आमुखे कविपरिचयः संक्षिप्तरूपेण करणीयः।

**विषयोपस्थापना** - अत्र उद्दिष्टविषयप्रवेशः। सन्दर्भः लेखनीयः। इह सर्वाः सूचनाः उपयुज्य लेखनीयः। लेखने सूचनानां घटनायाः च पूर्वापरक्रमः पालनीयः।

**उपसंहारः** (आवश्यकं चेत्) द्वित्रैः वाक्यैः उपसंहारः करणीयः।

**४.१.१ प्रदत्तस्य श्लोकस्य साहाय्येन कवेर्नारायणभट्टपादस्य वर्णनाचातुरीं प्रदर्शयत।**

वेदमार्गपरिमार्गितं रुषा त्वामवीक्ष्य परिमार्गयन्त्यसौ।
सन्ददर्श सुकृतिन्युलूखले दीयमाननवनीतमोतवे।।

**आमुखम्** - आमुखे कविपरिचयः संक्षिप्तरूपेण करणीयः।

**विषयोपस्थापना** - अत्र काव्यपरिचायः करणीयः। सन्दर्भः लेखनीयः। लेखने सूचनानां घटनायाः च पूर्वापरक्रमः पालनीयः।

**उपसंहारः** (आवश्यकं चेत्) द्वित्रैः वाक्यैः उपसंहारः करणीयः।

**४.२.१ श्लोकं पठित्वा आशयं लिखत।**

**श्लोकं पठित्वा भीमसेनस्यावस्थां स्ववाक्यैर्लिखत।**

**प्रदततस्य श्लोकस्य आशयं लिखत।**

**खण्डिकालेखनम्।**

**सूचनाः उपयुज्य हनुमता दृष्टं पुष्पकविमानं वर्णयत।**

**प्रदत्ताःसूचनाः आधारीकृत्य विनोदयात्रामधिकृत्य सुहृदं प्रति लेखमेकं लिखत।**

**<u>उपरिनिर्दिष्टरूपाणां प्रश्नानाम् उत्तरलेखनाय सामान्य सूचनात्र दीयते।</u>**

**आमुखम्** - आमुखे कविपरिचयः संक्षिप्तरूपेण करणीयः।

**विषयोपस्थापना** - अत्र काव्यपरिचायः करणीयः। सन्दर्भः लेखनीयः।

घटनायाः च पूर्वापरक्रमः पालनीयः।

**उपसंहारः** (आवश्यकं चेत्) द्वित्रैः वाक्यैः उपसंहारः करणीयः।

५ **आलापभेदयुक्तश्लोकचयनम्।**

५.१.१ विस्मितोत्स्मितसखीजनेक्षितां स्विन्नसन्नवपुषं निरीक्ष्य तां
नित्यमुक्तवपुरप्यहो हरे बन्धमेव मन्यथाः।।

२ **मनस्समाधाय तु शीघ्रगामिनं दुरावरं मारुततुल्यगामिनं**
**महात्मनां पुण्यकृतां महर्द्धिनां यशस्विनामग्र्यमुदामिवालयम्।।**

३ स्थीयतां चिरमुलूखले खलेत्यागता भवनमेव सा यदा।
प्रागुलूखलबिलान्तरे तदा सर्पिरर्पितमदन्नवास्थिताः।।

५.१.४ अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्य वैभवं
तन्नरं वपुषि कुञ्जरं मुखे मन्महे किमदि तुन्दिलं महः

५ **हरिन्मणिश्यामरुचीनि तत्र स्वैरं चरन्तीषु तृणानि गोषु।**
**शौरिःस्वयं भुक्त इवाप तृप्तिं तृप्यन्त्युदाराः परतर्पणेन।।**

६ गौरवं कथमियं सहेत मे मेदिनीति कृपयेव चिन्तयन् ।
माधवः पतनभीतिमुद्वहन् मन्दमेव निदधेः पदावलिम्।।

५.१.७ **यद्यपाशसुगमो विभो भवान् संयतः किमु सपाशयानया।**
**एवमादि दिविजैरभिष्टुतो वातनाथ परिपाहि मां गदात्।।**

८ भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि।
कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः।।

९ स तस्य मध्ये भवनस्य संस्थितं महद्विमानं मणिवज्रचित्रितं
प्रतप्तजाम्बूनदजालकृत्रिमं ददर्श धीमान् पवनात्मजः कपिः।।

५.१.१० **यद्यपाशसुगमो विभो भवान् संयतः किमु सपाशयानया।**
**एवमादि दिविजैरभिष्टुतो वातनाथ परिपाहि मां गदात्।।**

११ भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम्।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः।।

१२ अथ क्षमामेव निरस्तविक्रमश्चिराय पर्येषि सुखस्य साधनम्।
विहाय लक्ष्मीपतिलक्ष्मकार्मुकं जटाधरः सञ्जुहुधीह पावकम्

५.१.१३ तव प्रसादात्कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा।
कुर्यां हरस्यापि पिनाकपाणेः धैर्यच्युतिं के मम धन्विनोऽन्ये।।

१४ वर्णप्रकर्षे सति कर्णिकारः दुनोति निर्गन्धतया स्म चेतः।
प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः।।

१५ **गच्छता दशरथेन निर्वृतिं भूभुजामसुलभां भुजाबलात्।**
**मातुलस्य नगरे युधाजितः स्थापितौ भरतलक्ष्मणानुजौ।।**

**अधः दत्तेषु एकस्य श्लोकखण्डस्यालापने भेदोऽस्ति। काललयानुसारं तस्यालापनं कृत्वा आलापनभेदयुक्तं श्लोकं उद्धृत्य लिखत।**

५.१.१९ तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतोः
अन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ।।

२० जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।।

२१ **अरण्यरुदितं कृतं शवशरीरमुद्वर्तितं**
**स्थलेऽब्जमवरोपितं सुचिरमूषरेवार्षितम्।।**

**अधः प्रदत्तस्याशयप्रतिपादकं श्लोकांशं चित्वा लिखत।**

६. १ भगवान् बन्धनमनुमन्यते इत्यर्थप्रतिपादकं श्लोकं विविच्य लिखत।
**विस्मितोत्स्मितसखीजनेक्षितां स्विन्नसन्नवपुषं निरीक्ष्य ताम्।**
**नित्यमुक्तवपुरप्यहो हरे बन्धमेव कृपयान्वमन्यथाः।।**

२ कपटिषु शुद्धबुद्धिं प्रदर्शयन्तः विचारशून्यः पराभवं व्रजन्ति। युद्धे असंवृताङ्गान् भटान् तीक्ष्णशराः भृशं घ्नन्ति। एतदाशयप्रकाशकं श्लोकं पाठभागादनुस्मृत्य लिखत।
**व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।**
**प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान् निशिता इवेषवः।।**

३ अधः प्रदत्तस्याशयप्रतिपादकं श्लोकांशं चित्वा लिखत।
*मम कठिनाः मनोव्यथाः एव मामेवं वक्तुं व्यवसाययन्ति।*

**भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम्।**
**तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः।।**

४ भगवन्तं बन्धुं पाशमपर्याप्तिम् इत्याशयप्रतिपादकम् श्लोकमुद्धृत्यलिखत।

**बन्धुमिच्छति यमेव सज्जनस्तं भवन्तमयि बन्धुमिच्छती।**
**सा नियुज्य रशनागुणान् बहून् द्व्यङ्गुलोनमखिलं किलैक्षत।।**

७ **अन्वयलेखनम्।**

७.१. १ यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम्।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति।।

**अन्वयः - यस्य स्वयं प्रज्ञा नास्ति तस्य शास्त्रं किम् करोति। लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति।।**

२ रावणस्तु ततो गत्वा रणे जित्वा धनाधिपम्।
लङ्कापुरीं पुष्पकञ्च हृत्वा तत्रावसत् सुखम्।।

**ततः रावणस्तत्र गत्वा धनाधिपं रणे जित्वा लङ्कापुरीं पुष्पकं च हृत्वा सुखम् अवसत्।**

७.२ **श्लोकस्यान्वयं लिखत**

७.२.१ स तस्य मध्ये भवनस्य संस्थितं महद्विमानं मणिवज्रचित्रितम्।
प्रतप्तजाम्बूनदजालकृत्रिमं ददर्श धीमान् पवनात्मजः कपिः।।

[SEE TEXTBOOK PAGE 15,SLOKA 1]

२ श्रीपतिं प्रणिपत्याहं श्रीवत्साङ्कितवक्षसम्
श्रीरामोदन्तमाख्यासे श्री वाल्मीकिप्रकीर्तितम्।।

**श्रीवत्साङ्कितवक्षसम् श्रीपतिं प्रणिपत्य श्रीवाल्मीकिप्रकीर्तितं श्रीरामोदन्तम् अहमाख्यासे।**

३ तपस्समाधानपराक्रमार्जितं मनस्समाधानविचारचारिणम्।
अनेकसंस्थानविशेषनिर्मितं ततस्ततस्तुल्यविशेषदर्शनम्

[SEE TEXTBOOK PAGE 17,SLOKA 3]

४ वसन्तपुष्पोत्करचारुदर्शनम् वसन्तमासादपि कान्तदर्शनम्।
स पुष्पकं तत्र विमानमुत्तमं ददर्श तद्वानरवीरसत्तमः।।

[SEE TEXTBOOK PAGE 19SLOKA 7]

५ उच्चलद्ध्वनितमुच्चकैस्तदा तन्निशम्य जननी समाद्रुता।
त्वद्यशोविसरवद्ददर्श सासद्य एव दधि विस्तृतंक्षितौ।।

[SEE TEXTBOOK PAGE 30,SLOKA 4]

**७.६ प्रदत्तस्य पद्यस्य गद्यक्रमं पूरयत।**

७.६ १ यद्यपाशसुगमो विभो भवान् संयतः किमु सपाशयानया।
एवमादि दिविजैरभिष्टुतो वातनाथ परिपाहि मां गदात्।।

[SEE TEXTBOOK PAGE32,SLOKA 10]

२ व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान् निशिता इवेषवः।।

[SEE TEXTBOOK PAGE 47,SLOKA 2]

३ भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम्।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः।।

[SEE TEXTBOOK PAGE 46,SLOKA 1]

४ गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः।
परैस्त्वदन्यःक इवापहारयेन्मनोरमामात्मवधूमिव श्रियम्।।

[SEE TEXTBOOK PAGE 48,SLOKA 3]

५ अर्धपीतकुचकुड्मले त्वयि स्निग्धहासमधुराननाम्बुजे।
दुगधमीश दहने परिस्रुतं धर्तुमाशु जननी जगाम ते।।

[SEE TEXTBOOK PAGE 29,SLOKA 2]

**८ निर्दिष्टालङ्कारयुक्तश्लोकचयनम्।**

**८.१ उपमालङ्कारयुक्तं श्लोकं उद्धृत्य लिखत।**

**८.१.१ व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।**
**प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान् निशिता इवेषवः।।**

२ स तस्य मध्ये भवनस्य संस्थितं महद्विमानं मणिवज्रचित्रितम्।
प्रतप्तजाम्बूनदजालकृत्रिमं ददर्श धीमान् पवनात्मजः कपिः।।

३ एकदा दधिविमाथकारिणीं मातरं समुपसेदिवान् भवान्।
स्तन्यलोलुपतया निवारयन्नङ्कमेत्य पपिवान् पयोधरौ।।

८.१.४ भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम्।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः।।

# लौकिकन्यायावलिः

१ स्वकीयमल्पमपि ज्ञानमाधारीकृत्य बहुपाण्डित्यं प्रकटयन्तः केचिदल्पज्ञाः यथार्थज्ञानिनां पुरतः क्रीडावन्तः पराजयं भजन्ते। अस्यां घटनायां कः न्यायः प्रवर्तते।**कूपमण्डूकन्यायः**

२ कश्चन कृषकः कदलीक्षेत्रं पालयति स्म। क्षेत्रस्य समीपे नारिकेलवृक्षाश्चासन्।कदाचित् सुमहती वृष्टिः चण्डवातश्चाभवत्। ततस्स क्षेत्रसमीपमगच्छत्। दूरादेव नारिकेलवृक्षान् निपतितान् जले मग्नान् च दृष्ट्वा कदल्याःसर्वाः नाशमुपगताः इति सः अवगतवान्।

**दण्डापूपन्यायः**

३ कश्चन धीवरः नौकया मत्स्यबन्धनार्थं समुद्रान्तर्भागं गतः। झटिति तस्य नौका आवर्ते अपतत्। भीतःसः उच्चैः रोदनमकरोत्। किन्तु तस्य रोदनं वृथा अभवत्।**अरण्यरोदनन्यायः**

४ शृगालेन वञ्चितः सिंहः कूपे अपतत्। प्राणरक्षार्थं सः विलपति स्म। परं विलापः व्यर्थः जातः। **अरण्यरोदनन्यायः**

५ कश्चन वणिक् । रत्नसञ्चयं वहति।रात्रौ वनेनगमनम्। एकाकी। तस्कराणामाक्रमणम्। सम्पदां नाशः।उच्चैर्विलापः। रक्षणाय न कोऽपि आगतः।तस्य प्रयत्नः विफलो जातः। **अरण्यरोदनन्यायः**

६ ग्रामे सर्वत्र मारकरोगःव्याप्तः। तेन केचन मृताः। जनास्सम्भूया धिकारिणे रोगनिर्मार्जनार्थं बहुवारं निवेदनं दत्तवन्तः। तथापि किमपि प्रतिकरणं नासीत्।**अरण्यरोदनन्यायः**

७ निरीक्षणार्थमागतः पर्यवेक्षकः द्वित्रान् छात्रान् परीक्ष्य कक्ष्या समीचीना इति निरणयत्। अत्र कः न्यायः प्रवर्तते। **स्थालीपुलाकन्यायः**

८ आत्मानं पण्डितं मन्यते मूढः।विज्ञानां गोष्ठ्यां तस्याविवेकः प्रकटो भवति। अत्र कः न्यायः **कूपमण्डूकन्यायः**

९ एकस्मिन् दिने जोसफःविमाननिस्थानं द्रष्टुं गतवान्। तत्र बहुकालानन्तरमागतमात्मसुहृदं दृष्ट्वा सः अतीव सन्तुष्टः जातः। अत्र कः न्यायः प्रवर्तते।**काकतालीयन्यायः**

१० कश्चन बालकः पिपासया नदीतीरं गतवान् ।तत्र बहूनि सोपानानि सन्ति। अवरोहणसमये झटिति पतित्वा मृतवांश्च। अत्र को वा लौकिकन्यायः युक्तः ।**काकतालीयन्यायः**

११ समस्वभावात् समुदायादन्यतमं गृहीत्वा परीक्षणेन समुदायस्य सर्वस्यापि स्वभावः निर्णी यते। अत्र को वा लौकिकन्यायः युक्तः ।**स्थालीपुलाकन्यायः**

१२ वनमहिषस्य पादाघातेन सिंहोऽपि नूनं निपतेत्। पुनः वनेचराणामवस्था का। अत्र को वा न्यायः युक्तः ।**दण्डापूपन्यायः**

१३ कश्चन पुरुषः नारिकेलवृक्षमारुह्य फलसमूहादेकं पक्वं ज्ञात्वा सर्वाणि फलानि सञ्चिनोतिस्म। सर्वेषां फलानां पाकतामधिकृत्यावगतिः केन न्यायेनात्र सञ्जाता। **स्थालीपुलाकन्यायः**

१४ कक्ष्यायां पद्यपाठं सम्यक् पाठयित्वा अध्यापिका तया पाठितं छात्रैरवगतं वा न वेति जिज्ञासया कांश्चित् छात्रान् प्रश्नानपृच्छत्। छात्रास्समीचीनमुत्तरं दत्तवन्तः। तेषामुत्तरं श्रुत्वा पाठितः पद्यभागः छात्रैः ज्ञातः इति सा अजानात् ।अत्र को वा लौकिकन्यायः युक्तः ।**स्थालीपुलाकन्यायः**

१५ एकदा कोऽपि कृषकः क्रमुकफलानां विक्रयणार्थं विपणिं गतवान्। स आपणिकस्य पुरतःक्रमुकं स्थापितवान्। आपणिकः तानि कर्तनंकृत्वा परीक्षितवान्। तदनन्तरं उत्तमानि तानि इति दृष्ट्वा कृषकाय प्रतिफलं अदात्। अत्र कः न्यायः युज्यते। **स्थालीपुलाकन्यायः**

## सन्धिच्छेदं लिखत

| | | |
|---|---|---|
| १ | वेति। | वा इति |
| २ | वसुधैव। | वसुधा एव |
| ३ | वसिष्ठकोऽस्वस्थोऽभवत्। | वसिष्ठकः अस्वस्थः अभवत् |
| ४ | विशेषमालम्ब्य। | विशेषम् आलम्ब्य |
| ५ | शुष्कमिवाग्निरुच्छिखः। | शुष्कम् इव अग्निः उच्छिखः |
| ६ | बाल्य एव। | बाल्ये एव |
| ७ | प्रदर्शितवानयम्। | प्रदर्शितवान् अयम् |
| ८ | सिंहोऽपि निपतेन्नूनम्। | सिंहः अपि निपतेत् नूनम् |
| ९ | इत्युद्घोषयन्नयम्। | इति उद्घोषयन् अयम् |
| १० | गिरेर्शिखरम्। | गिरेः शिखरम् |
| ११ | तूलिकयेव। | तूलिकया इव |

| | | |
|---|---|---|
| १२ | वपुर्विभक्तम् । | वपुः विभक्तम् |
| १३ | मृगमुपसृत्यावोचत् । | मृगम् उपसृत्य अवोचत् |
| १४ | क्षुद्रबुद्धिर्नाम जम्बूकोऽहम् । | क्षुद्रबुद्धिः नाम जम्बूकः अहम् |
| १५ | त्वमात्मानम् । | त्वम् आत्मानम् |
| १६ | मृतवत्सन्दर्श्य । | मृतवत् सन्दर्श्य |
| १७ | वातेनोदरम् । | वातेन उदरम् |
| १८ | तत्रागत्य । | तत्र आगत्य |
| १९ | उपस्थितोऽचिन्तयत् । | उपस्थितःअचिन्तयत् |
| २० | उपस्थापितवानयम् । | उपस्थापितवान् अयम् |
| २१ | अस्माल्लोकात् । | अस्मात् लोकात् |
| २२ | सर्वमेतत् । | सर्वम् एतत् |
| २३ | पश्यन्नवर्तत । | पश्यन् अवर्तत |
| २४ | तस्माददतितराम् । | तस्मात् अतितराम् |
| २५ | भीतोऽस्मि । | भीतः अस्मि |
| २६ | ससम्भ्रममवदत् । | ससम्भ्रमम् अवदत् |
| २७ | तत्परश्च | तत्परः च |
| २८ | सुकरमभवत् । | सुकरम् अभवत् |
| २९ | प्रतिदिनमस्माकं । | प्रतिदिनम् अस्माकम् |
| ३० | सकाशमागच्छति । | सकासम् आगच्छति |
| ३१ | तथैव । | तथा एव |
| ३२ | किमपि । | किम् अपि |
| ३३ | कथमपि | कथम् अपि |
| ३४ | पुनरपि । | पुनः अपि |
| ३५ | द्रष्टुमुपायम् । | द्रष्टुम् उपायम् |
| ३६ | गृहमागच्छति । | गृहम् आगच्छति |
| ३७ | अनूदितवानयम् । | अनूदितवान् अयम् |
| ३८ | चिन्तयन्निव । | चिन्तयन् इव |
| ३९ | युवकश्चासीत् । | युवकःच आसीत् |
| ४० | इत्युक्त्वा । | इति उक्त्वा |
| ४१ | सेयम् । | सा इयम् |

| | | |
|---|---|---|
| ४२ | सर्वैरनुज्ञायताम्। | सर्वैः अनुज्ञायताम् |
| ४३ | शान्तश्च। | शान्तः च |
| ४४ | कश्चिदुष्ट्रः। | कश्चिद् उष्ट्रः |
| ४५ | त्रयोऽपि। | त्रयः अपि |
| ४६ | कैरल्यामनूदितवानयम्। | कैरल्याम् अनूदितवान् अयम् |
| ४७ | चिरमन्विष्यापि। | चिरम् अन्विष्य अपि |
| ४८ | नालभत। | न अलभत |
| ४९ | ह्येवम्। | हि एवम् |
| ५० | कोऽयम्। | कःअयम् |
| ५१ | विदंश्च। | विदन् च |
| ५२ | इत्यूचिषि। | इति ऊचिषि |
| ५३ | यावच्चारमुखात्। | यावत् चारमुखात् |
| ५४ | निशयैकया। | निशया एकया |
| ५५ | जनैस्तदा। | जनैः तदा |
| ५६ | इत्युवाच। | इति उवाच |
| ४७ | त्वामवीक्ष्य। | त्वाम् अवीक्ष्य |
| ४८ | परिमार्गयन्त्यसौ | परिमार्गयन्ती असौ |
| ४९ | सुकृतिन्युलूखले। | सुकृतिनि उलूखले |
| ५० | नवनीतमोतवे | नवनीतम् ओतवे |
| १ | निरुद्धा गतिःयस्य सः। | निरुद्धगतिः |
| २ | वृद्धः च असौ वानरः च। | वृद्धवानरः |

३ कुण्डलैः शोभितं आननं येषां ते।
कुण्डलशोभितानननम्।
४ ऊर्ध्वं मुखं यस्य सः। ऊर्ध्वमुखः
५ निर्गता दया यस्याःसा। निर्दया
६ महतः वचनम्। महद्वचनम्
७ भोक्तुं इच्छा। बुभुक्षा
८ अत्यन्तं महान्। अतिमहत्
९ वने भवः। वन्यः
१० धीरस्य भावः । धैर्यः
११ अक्ष्णोः परम्। परोक्षम्
१२ वञ्चयितुं कामो यस्य सः।
वञ्चयितुकामः।
१३ भोक्तुं कामो यस्य सः। भोक्तु
कामः।
१४ दिने दिने । प्रतिदिनम्
१५ पदे पदे । प्रतिपदम्
१६ ज्ञातुम् इच्छा। जिज्ञासा
१७ मोक्तुं इच्छा । मुमुक्षा
१८ केरैः करम्बिता सा ।
केरकरम्बिता
१९ विपुलनवाम्बुदा एव दिवपथिकायस्यां। विपुलनवाम्बुददिवपथिका
२० कुटिला मतिः यस्या सा ।
कुटिलमतिः
२१ प्रतिवेशे भवः ।
प्रातिवेशिकः
२२ पवनस्य आत्मजः ।
पवनात्मजः
२३ भयेन धावनम् ।
पलायनम्

२४ अयसा निर्मितः कवचः ।

अयोमयकवचः ।

२५ गोलिका एव अस्त्रं................ । गोलिकास्त्रं

२६ गोलिकास्त्रस्य प्रयोग ।

गोलिकास्त्रप्रयोगः

२७ आन्त्रस्यमाला................ ताम्।

आन्त्रमालाम् ।

२८ उन्नतस्य भावः ।

औन्नत्यम्

२९ पादस्य आघातः........... तेन ।

पादाघातेन

३० शत्रोः निरीक्षणम्।

शत्रुनिरीक्षणम्

३१ जीवस्य रक्षणम्।

जीवरक्षणम्

३२ क्षुत् पिपासा च क्षुत्पिपासेताभ्यांपीडितः।क्षुत्पिपासापीडितः।

३३ इतिहासं विदन्ति इति ।

इतिहासविदः

३४ भृशं जयति ।

जेजीयते

३५ धरति इति ......... । धरः

पयसां धरः...........।

पयोधरः

३६ स्निग्धः च असौ हासः ।

स्निग्धहासः

३७ प्रयत्नं कृतवन्तः ।

प्रयतितवन्तः

३८ अत्यन्तं प्रचारं प्राप्तः ।

प्रचुरप्रचारः

३९ सूचनारूपेण परिचयः ।

दिङ्मात्रपरिचयः

४० मिश्रणं कृत्वा ।

सम्मिश्र्य

४१ गीतं वाद्यं नृत्तं च ।

तौर्यत्रिकम्

४२ अरूपं रूपवन्तं करोति ।

रूपवत्करोति

४३ अन्यः देशः ।

देशान्तरम्

४४ विमर्शनेन सहवर्तत इति ।

सविमर्शम्

४५ अत्यन्तं वृद्धः।

वर्षिष्ठः

४६ वृद्धः ज्यायान् ।

ज्येष्ठः

४७ दुष्कवय एव कुञ्जरः।

दुष्कविकुञ्जरः

४८ उद्दण्ड एव केसरी ।

उद्दण्डकेसरी ।

४९ वेदान्त एव वनं...................

वेदान्तवनम्

तत्र सञ्चरितुं शीलं अस्य अस्तीति। वेदान्तवनसञ्चारी

५० न संवृतानि ।

असंवृतानि

५१ पिणडार्थं अन्नम् ।

कव्यम्

५२ बलिं भुञ्जते इति ।

बलिभुक्

५३ अण्डात् जातः ।

अण्डजः

५४ अन्येषु देशेषु । देशान्तरेषु

५५ अहनि अहनि।

प्रत्यहम्

५६ प्रमदा जनेन उदितम् ।

प्रमदाजनोदितम्

५७ भवन्त इव दृश्यन्ते इति ।

भवादृशः

५८ नार्यःसमया...........निरस्ताःनारीसमयाः यैः ते। निरस्तनारीसमयाः

५९ दुः/दुष्टाः आधयः ।

दुराधयः

६० मूढा धीः येषां ते। मूढधीः

६१ गुणैः अनुरक्ता या सा..........ताम्।

गुणानुरक्ताम्

६२ अनुरक्तं साधनं यस्य सः।

अनुरक्तसाधनः

६३ कुलस्य अभिमानो यस्य सः।

कुलाभि

६४ कुले जाता इति.............. ताम्।

कुलाभिमानी

६५ नराणां अधिपः।

नराधिपः

६६ मनः रमयति इति।

मनोरमा

६७ मनः दृढं अस्य अस्ति इति । मनस्वी

६८ नराणां देवः।

नरदेवः

६९ शम्याः तरुः।

शमीतरुः

७०	उद्गतः शिखा यस्य सः ।
उच्छिखः
७१	लोहितं च तत् चन्दनम् ।
लोहितचन्दनम्
७२	पदाभ्यां अतति इति ।
पदातिः
७३	रेणुभिः रूषितः।
रेणुरूषितः
७	गिरिषु अन्तः।
अन्तर्गिरिः
७	महान् रथः यस्य सः।
महारथः
७६	वृकस्योदरमिव उदरं विद्यते यस्य सः। वृकोदरः
७७	सत्यमेव धनं यस्य सः।
सत्यधनः
७८	वासव उपमा यस्य सः।
वासवोपमः
७९	वल्कानि एव वासांसि।
वल्कवासांसि
८०	कुप्यात् अन्यत् ।
अकुप्यम्
८१	धनं जयति इति।
धनञ्जयः
८२	न कठिना ।
अकठिना
८३	वनान्त एव शय्या ।
वनान्तशय्या
८४	कचैः आचितौ ।
कचाचितौ
८५	न गच्छति इति ।	नगः

८६ अगे जातौ । अगजौ

८७ धृतिः च संयमः च।

धृतिसंयमौ

८८ द्विषन्तः निमित्तं यस्याः सा ।

द्विषन्निमित्ता

८९ मूलेन सह वर्तत इति ।

समूलम्

९० न पर्यासिता ।

अपर्यासिता

९१ पुरः सरन्ति इति ।

पुरस्सराः

९२ धाम विद्यते येषाम्..........तेषाम्।

धामवताम्

९३ निर्गतः आश्रयः यस्याः सा ।

निराश्रया

९४ मनस्विनः भावः।

मनस्विता

९५ दुखेन सोढुं शक्यम् ।

दुःसहम्

९६ अत्यन्तं दुस्सहम् ।

सुद्स्सहम्

९७ निरस्त विक्रमो येन सः।

निरस्तविक्रमः

९८ लक्ष्म्याः पतिः।

लक्ष्मीपतिः

९९ जटानां धरः... ।

जटाधरः

१० खण्डं खण्डं कल्पितः।

खण्डशः

१०१ विस्रगन्ध अस्य अस्ति इति.....।

विस्रगन्धी

१०२ हस्ते गृहीतपत्रः ।

पत्रहस्तः

१०३ गृध्राय बलिः ।

गृध्रबलिः

१०४ जालेन जीवितुं शीलमस्यास्ति इति।

जालोपजीवी

१०५ परिमुक्तं बन्धनं यस्य सः।

परिमुक्तबन्धनम्

१०६ दानं कारितः।

दापितः

१०७ विविच्य ज्ञानं ..........

विवेकः

न विवेकः ................ ।

अविवेकः

१०८ तस्य इदम् ।

तदीयम्

१०९ मम इदम् ।

मदीयम्

११० अन्यत् द्वीपम् ।

द्वीपान्तरम्

१११ सेनां नयति इति ।

सेनानीः

११२ मार्गस्य मध्ये ।

मार्गमध्ये

११३ बद्धः हृदयः यस्य सः ।

बद्धहृदयः

११४ संशयितं मनः यस्य सः।

संशयितमनः

**एकेन पदेन उत्तरं लिखत।**

४२ मुद्राङ्गुलीयकलाभ इति नाटकभागः कस्मात् ग्रन्थात् उद्धृतः। **अभिज्ञानशाकुन्तलात्।**

४३ मुद्राङ्गुलीयकलाभाख्ये नाटकभागे धीवरेण लब्धे अङ्गुलीयके लिखितं नाम किमासीत्। **दुष्यन्तः।**

४४ अस्मिन्नवसरे आफ्रिक्कादेशादागतः मूर्वंशीयः वर्णेन कृष्णः ओथल्लः वेनीस् नगर्यां सेनानी बभूव। वाक्यमेतत्पठित्वा अधोदत्तपदानि उत्तरत्वेन लब्धुं युक्तं प्रश्नचतुष्टयं लिखत।

१ आफ्रिक्कादेशादागतः २ सेनानी ३ वर्णेन कृष्णः ४ मूर्वंशीयः

**१ ओथल्लः कस्माद्देशादागतः?**

**२ वेनीस् नगर्यां ओथल्लस्य उद्योगःकीदृश आसीत्**

**३ओथल्लः कीदृश आसीत्**

**४ओथल्लः कस्मिन् वंशे जातः**

४५ निर्जीवमपि वस्तु वीरमारणकारणं स्यात्।कस्यां कथायां एष आशयःप्रकटितः। को वा तद्वस्तुः। **हस्तांशुकः।**

**koramangalam krishna kumar**
**mimhighersecondaryschool,perode**
**9447256982**